No. १२८६५

Title ज्ञान द्रव्य कारणता विचार-

Author वंशीधरः -रहस्यम्

Extent २ Age १८५३

Subject न्याय शास्त्रम्

ज्ञानद्वयकारणताविचाररहस्यम्

१२६५

श्रीमज्जानकीजानये नमः ॥ अनुमितिं प्रति व्याप्तिविशिष्टहेतुमत्तानिश्चयः कारणमिति नैयायिकाः । तन्मीमांसकमतानुयायिनः अनुमितिं प्रति परामर्शत्वे
न हेतुत्वे हेतुतावच्छेदकीभूतानन्यथासिद्धत्वनियतपूर्ववृत्तित्वदलद्वयस्योपदर्शितविशिष्टगुरुधर्मावच्छेदेन कल्पने गौरवात् स्वरूपस्य नियतपूर्ववर्तित्वेनोभयथा
ऽपि सिद्धे पक्षतापन्नतावच्छेदकावच्छिन्नविशेष्यकव्याप्तिप्रकारकज्ञानत्वावच्छिन्ने पक्षविशेष्यकहेतुप्रकारकज्ञानत्वावच्छिन्ने प्रमितयोर्हेतुत्वकल्पनमेव सम्य
क् तदुभयधर्मावच्छेदेनानन्यथासिद्धत्वरूपकारणतावच्छेदककल्पने गौरवमते लाघवसंभवात् अनुमितिं प्रति व्याप्यतावच्छेदकावच्छिन्नविशेष्यक
व्याप्तिप्रकारकज्ञानत्वरूपविशेष्यकहेतुप्रकारकज्ञानत्वाभ्यां कार्यकारणभावकल्पने आलोकेऽवह्निव्याप्यो धूमवांश्च पर्वत इत्यादिज्ञानात् सर्वतो वह्नि
मानित्यनुमित्यापत्तिरिति तन्नाशंकनीयं । एतेन वर्त्यसामान्यतोऽनुमितित्वावच्छिन्नं प्रत्युपदर्शितसामान्यधर्मद्वयावच्छेदेन हेतुतानुसरीकुर्मः । किं तु वि
शिष्टपर्वतोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति धूमत्वावच्छिन्नविशेष्यव्याप्तिप्रकारकज्ञानत्वेन पर्वतत्वावच्छिन्नविशेष्यकधूमत्वावच्छि
न्नप्रकारताशालिज्ञानत्वेन च तथात्वं तत्र च नोपदर्शितातिप्रसंगलेशोऽपि । न च पर्वतोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रत्युपदर्शितविशेषध
र्मद्वयाभ्यां हेतुत्वकल्पने धूमत्वावच्छिन्नविशेष्यतावह्निनिरूपितव्याप्तिप्रकारतयोर्विशेष्यविशेषणभावेन । एवं पर्वतत्वावच्छिन्नविशेष्यतानिरूपि
तधूमप्रकारताशालिज्ञानत्वयोर्विनिगमनाविरहेण कार्यकारणभावबाहुल्यापत्तेर्गौरवमिति वाच्यं । नैयायिकमतेऽपि व्याप्तिप्रकारकधूमप्रकारकत्वे
पक्षविशेष्यकत्वादीनां विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यस्यावश्यकतया मन्मतेऽप्युपदर्शितगौरवस्यानवकाशादित्याहुः ।
अत्रेदं तु विचारयामः यदि च विशिष्टपरामर्शत्वेन हेतुत्ववादिनैव धूमविशेष्यकव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नपर्वतविशेष्यकधूमप्रकारकनिश्च

ता॰ ह॰

१ यत्नावच्छिन्नयोः पर्वतो वह्निमानित्यनुमितिनिमित्ततत्पूर्ववृत्तित्वं सिद्धं तथैवोपदर्शितत्वात् घटसमवायो मीमांसकमते तेदयन वह्निव्याप्यालोकवान्पर्वत इत्यत्र तयोरभा
वात् न च तयोरभावेऽपि वह्निव्याप्यधूमवानित्यत्र तदुभयधर्मावच्छिन्नस्य सत्वात् तत्रैव तदुभयधर्मावच्छिन्नयोर्वह्निव्याप्यधूमवानिति निर्णयपूर्ववृत्तित्वस्य नैयायिकाभ्युप
गतस्य मीमांसकमते उपदर्शितत्वात् घटसमवाय इति वाच्यं स्वलविशिष्टस्य तदुभयधर्मावच्छिन्नयोर्नियतपूर्ववृत्तित्वविशिष्टस्य ममतत्वे तथा च तदुभयस्य व्याप्यानु
मितिं प्रति हेतुत्वं कल्पनेन तदर्थं नैयायिकमते विशिष्टस्य निश्चय यत्नावच्छिन्नस्य नियतपूर्ववृत्तित्वस्य तथा तेन व्याप्यानुमितिं प्रति हेतुत्व
कल्पने गौरवाभावात् न च विनिगमनाविरहात् तदुभयस्यापि हेतुत्वसिद्धिरिति वाच्यं तदुभयधर्मावच्छेदेनान्यथासिद्धत्वस्य कल्पनोपक्षयाविशिष्ट
निश्चयत्वस्यैकधर्मावच्छेदेनान्यथासिद्धत्वकल्पने लाघवस्यातिस्फुटत्वात् अथ पर्वतो दृष्टपक्षवह्निविधेयकानुमितिं प्रति वह्निव्याप्यधूमप्रकारक
पर्वतविशेष्यकज्ञानत्वेन हेतुत्वं वाच्यमिति आलोकसंशयात्मकतथाविधज्ञानसत्वेऽनुमित्यापत्तिः एवं धूमाद्यंशे संशयात्मकतथाविधज्ञानस
त्वेऽपि तथा च तद्वारणाय वह्निव्याप्याभावाप्रकारकत्व धूमाभावाप्रकारकत्वे सति धूमाद्यभावाप्रकारकं पर्वतो वह्निव्याप्यधूमप्रकारकं ज्ञानं तत्वेन त
थाविधानुमितिं प्रति हेतुत्वं नैयायिकेरंगीकर्तव्यमिति तन्मते आलोकाभावाप्रकारकत्व धूमाभावाप्रकारकत्वयोरेकत्र निवेशे तयोरितरपदार्थे सह
विशेष्यविशेषणभावे विनिगमनाविरहात् कार्यकारणभावबाहुल्यं कारणतावच्छेदकगौरवं च मीमांसकमते वह्निव्याप्यधूमाभावाप्रकारकत्व
स्य धूमांशे वह्निव्याप्तिज्ञाननिष्ठजनकतावच्छेदककोटौ धूमाभावाप्रकारकत्वस्य धूमप्रकारकज्ञाननिष्ठजनकतावच्छेदककोटौ निवेशनीयतया त
योरेकत्र निवेशनीयतया गौरवं दूरपराहतमेव न च तदुभयनिष्ठजनकतावच्छेदककोटावुपदर्शितवह्निव्याप्याभावाप्रकारकत्वधूमाभावाप्रकारक रामः
त्वयोर्निवेशे तत्रैव परस्परं विशेष्यविशेषणभावे विनिगमनाविरहात् कार्यकारणभावबाहुल्यं मीमांसकमतेऽपि तस्मिन्निति वाच्यं परीक्ष्येन तत्र तयोर्निवेशेऽप्यत्र धूमवान्पर्वत इति १

त्वात् । अयं धूमो वह्निव्याप्य इत्येवंविधस्य तत्र वह्निमानित्यनुमित्यापत्तेः एवं च यत्र वह्निव्याप्यो धूम इति ज्ञानं ततश्च धूमवान् पर्वत इति संशयात्मकस्यापि
विधानुमित्यापत्तेरिति विनिगमनाविरह इति चेन्न । तादृशानुमितिं प्रति वह्निव्याप्यत्वविशिष्टधूमप्रकारकत्वसत्यां पाञ्चविध्यताया निरूपितपर्वतत्वावच्छिन्नविशे
ष्यताशालिनिश्चयत्वेन हेतुत्वकल्पनात् । नैयायिकमते व्याप्त्यंशे निश्चयत्वनिवेशनोपदर्शितगौरवासंभवात् । यत्तु तेन रूपेण हेतुत्वकल्पने व्याप्त्यंशे सं
शयासंभव एव बीजं तच्च न संभवति । तादृशनिर्णयकाले वह्निव्याप्यधूमप्रकारकज्ञानेऽव्यवहितोत्तरकाले सत्त्वे वह्निव्याप्यांशे संशयात्मकतया विशिष्टविशि
ष्टवैशिष्ट्यविषयताभावाद्वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकज्ञानोत्पत्तौ बाधकाभावात् संशयात्मकद्विविधविषयकेऽपि विशिष्टनिर्णये प्रतिब
न्धकतया तदुच्छेदे विशिष्टनिर्णयाभावस्य कारणत्वादिति तथाविधसंशयोत्तरमनुमित्यापत्तिवारणाय व्याप्त्यंशे निर्णयत्वनिवेशापेक्षया पूर्वोक्त
कार्यकारणभावस्यैव लाघविकत्वेन कल्पनीयतया पूर्वोपदर्शितगौरवं तदवस्थमेवेति दुष्टमिदमेव । न च तादृशज्ञानसत्त्वे सहचरितपदार्थानन्तरमनुमित्यापत्तेः । आ
हार्यज्ञानादनुमित्यापत्तिवारणायानुमितिजनकतावच्छेदककोटावनाहार्यत्वनिवेशस्यावश्यकतयादितिवाच्यम् । अनुमितिजनकतावच्छेदककोटौ प्रवि
ष्टानाहार्यत्वस्यानुगतनिर्वचनासंभवात् । न च विशिष्टानां तथाविधतत्संशयत्वावच्छिन्नभेदः स्यादनुमितिजनकतावच्छेदककोटौ निवेशनीय
कत्वांशे निश्चयत्वसिद्धेः तथा चोपदर्शितगौरवं नैयायिकमते दुष्परिहरमेवेति । नन्वेवं विशिष्टवैशिष्ट्यबुद्धिं प्रति विशेषणतावच्छेदकप्रकारक
ज्ञानत्वेन कार्यकालवृत्तित्वेन धर्मिविशेष्यकज्ञानाभावत्वेन हेतुत्वं स्वीकृत्य वह्नौ धूमव्यापनीयतया तस्य विशेषणतावच्छेदकप्रका
रकनिर्णयत्वेन हेतुत्वाभावेनोपदर्शितसंदेहविशिष्टवैशिष्ट्यविषयताया अभावात् कार्यकाले विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावात् त
स्याश्च विशिष्टवैशिष्ट्यविषयताया अनुमितिजनकतावच्छेदकत्वे जनकतावच्छेदककोटौ व्याप्त्यंशे निश्चयत्वाप्रवेशात् तत्रापि निवेशप्रयुक्तगौरवस्यैव

२ यिकत्वेन शंकासम्भावदतीति केचित्तु मायात्मप्रदर्शितरीत्या व्याप्यांशे निश्चयत्वप्रयुक्तगौरवं विशिष्टपरामर्शहेतुतावादिमते तथापि व्याप्यांशे ऽप्रामाण्य
ज्ञानाभावस्य हेत्वंशे ऽप्रामाण्यज्ञानाभावस्यैकस्य निवेशात् तत्प्रयुक्तविशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावद्वयवच्छेदकगौरवस्य च दु
ष्परिहरत्वमेव। मीमांसकमते तु तादृशतया प्रामाण्यज्ञानाभावस्य स्वरूपसत एव जनकतावच्छेदककोटौ निवेशेन तयोरेकत्रानिवेशात् विशेष्यविशेषण
भावप्रयुक्तगौरवानवकाश इत्याहुः तदपि न विचारसहम् विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावद्वयसिद्धिः यथा ऽप्रामाण्यज्ञानाभा
वस्यानुमितिजनकतावच्छेदककोटावनिवेशात् न चाप्रामाण्यज्ञानाभावस्यानुमितिजनकतावच्छेदककोटावनिवेशे ऽप्रामाण्यज्ञानाकलितपरामर्श
कालेऽनुमित्यापत्तिरिति वाच्यं अनुमितिं प्रत्यप्रामाण्यज्ञानाभावस्य हेतुत्वोपगमात् न चानुमितिं प्रति समवायसंबंधघटितसामानाधिकरण्यसं
बंधावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्य हेतुत्वे क्रमोत्पन्नधूमपरामर्शद्वयकाले ऽन्यतरपरामर्शे ऽप्रामाण्यग्रहसत्वेऽनुमित्यनुपपत्तिर्दु
र्वारैवेति वाच्यं स्वात्मवृत्तित्वं ... वच्छिन्नविशेष्यतासंबंधावच्छिन्नाभावप्रतियोगितासंबंधावच्छिन्न- -प्रामाण्यज्ञानाभावत्वेनाप्र
संबंधेनानुमितिं प्रति विशेष्यतासंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्य हेतुत्वेनोक्तानुपपत्तेरभावात् न चाप्रामाण्यज्ञानाभावस
त्वे धूमपरामर्शे व्यसति समवायसंबंधेन धूमपरामर्शवत्तासमवायसंबंधेनात्मन्यनुमित्यापत्तिः समवायसंबंधेन धूमपरामर्शनिष्फलत्वेन विशे
ष्यतासंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्य हेतुत्वांगीकारे तु तस्यापि घटपरामर्शे सत्वेनोक्तापत्तेरसंभवादुक्तत्वमेवेति वाच्यं
धूमपरामर्शवृत्तिसामानाधिकरण्यसंबंधेनानुमितिं प्रति तादात्म्यसंबंधेन तस्य हेतुत्वकल्पने नोक्तदोषः समवायेनोपदर्शितरीत्यापत्तेरसंभ राम:
वात् न च तथापि तद्धूमपरामर्शवृत्तिसामानाधिकरण्यसंबंधेनानुमित्यापत्तिर्दुर्वारैवेति वाच्यं तादात्म्यसंबंधेनानुमितिं प्रति विशेषणता २

तादात्म्येनाभवघटितसामानाधिकरण्यसंबंधेनाप्रामाण्यज्ञानाभावविशिष्टो यो धूमपरामर्शस्तदुत्तरसामग्र्या निष्कामकत्वांगीकारात् तथा च वक्ष्योपदर्शिताप्रामा
ण्यज्ञानाभावानामेकत्र निवेशप्रयुक्तगौरवं नैयायिकमत इति न विभ्रमः यदपि कारणत्वस्यातिरिक्तमेव कुर्वंति न आनां मतमवलंब्य विनिगमनाविरहेणो
पदर्शिताभयस्वरूपेण हेतुत्वमपि विनिगमनाविरहेण संभवतीत्याह तदपि न वह्निव्याप्यधूमवान्पर्वत इति परामर्शकाले इदं ज्ञानं वह्निव्याप्याभाववति वह्निव्या
प्यप्रकारकमिति सप्रामाण्यग्रहस्थले यत्र पर्वते वह्निमानित्यनुमित्युत्पत्तिकारणप्यतात् उभयस्वरूपेण हेतुत्ववादिनां तादृशाप्रामाण्यज्ञानाभावो धूमप्र
कारकपर्वतविशेष्यकज्ञानत्वावच्छिन्ननिष्ठानुमितिजनकतावच्छेदककोटाववश्यं निवेशनीयः तथा च धूमवान्पर्वतो वह्निव्याप्यो धूम इति ज्ञानसत्वे धू
मवान्पर्वत इति वह्निव्याप्याभाववति व्याप्यप्रकारकमिति प्रामाण्यज्ञानकाले ऽनुमित्यनुत्पत्तेः एवं वह्निव्याप्याभाववान्पर्वतो वह्निव्याप्यधूमवान्वे
त्याकारकसंदेहकाले ऽनुमित्यापत्तिवारणाय व्याप्यत्वावच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वं धूमप्रकारकपर्वतविशेष्यकज्ञाननिष्ठजनकतावच्छेद
ककोटाववश्यं तेन निवेश्यं तथा च वह्निव्याप्यो धूमो वह्निव्याप्याभाववान्पर्वतो धूमवांश्चेति ज्ञानसत्वे ऽप्यनुमित्यापत्तेस्तुच्छत्वाच्चेति विशिष्टपरामर्शहे उप८
तुत्ववादिमतेमवसम्यगालोकयामः॥ ॥परंतु पर्वतविशेष्यकधूमप्रकारकज्ञाननिष्ठानुमितिजनकतावच्छेदककोटावुपदर्शितरीत्याप्रामाण्यज्ञाना
भावस्य वह्निव्याप्यत्वावच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वस्य च निवेशे ऽपि मीमांसकमते तूपदर्शितोभयस्थले दत्तापत्तिदानावकाशः तथाहि
यदि सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगितावच्छेदकोपदर्शिताप्रामाण्यज्ञानाभावस्य स्वरूपसंबंधावच्छिन्नप्रतियोगिताकवह्निव्या
प्यत्वावच्छिन्नप्रतियोगिताकाभावस्य च सामानाधिकरण्यसंबंधेन तथाविधकारणतावच्छेदककोटौ निवेशस्तदोपदर्शितापत्तिः संभवति तदे
वन किंतु व्याप्यत्वावच्छिन्नप्रतियोगिताकाभाववद्विशेष्यकत्वप्रकारतानिरूपितायां व्याप्यत्वावच्छिन्नप्रकारकत्वनिष्ठप्रकारतायां इदं त्वा

२ त्वावच्छिन्नविशेष्यताकतत्संबंधावच्छिन्नप्रतियोगिताकतथाविधाप्रामाण्यग्रहाभावः एवं वावच्छेदकतावच्छिन्नत्वस्य निरूपकज्ञाननिरूपिततोभयसंबंधावच्छिन्नायाः पर्वतविशेष्यतानिरूपि
तधूमभावप्रकारतानिरूपितप्रतियोगितासंबंधावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपितप्रतियोगिताकभेदस्यानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकीभूतधू
मप्रकारतायां निवेशनीयः तथाच्चोपदर्शितज्ञानद्वयकाले वह्निव्याप्याभाववति वह्निव्याप्यप्रकारकमिदं ज्ञानमित्यप्रामाण्यग्रहके एवं वह्निव्याप्यधूमवह्निव्याप्याभाववा
3 न्पर्वतो धूमवांश्चेति ज्ञानकाले च नानुमित्यनुपपत्तिः तादृशज्ञानीयधूमप्रकारतायां व्याप्यत्वावच्छिन्नविरहेण तथाविधसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकोपदर्शितभे
दस्योपदर्शितसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य च सत्त्वेनोपदर्शितानुमितिजनकतावच्छेदकावच्छिन्नस्य सत्त्वादित्याहुस्तदपि न समीचीनमाभाति.
तथाहि धूमप्रकारकज्ञाननिष्ठजनकतावच्छेदकधूमप्रकारतायामुपदर्शितसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य निवेशे धूमवान्पर्वत इति ज्ञाने एकपु
रुषांतरीयतथाविधाप्रामाण्यज्ञानसत्त्वेनुमित्यनुपपत्तिः न च तत्पुरुषीयत्वेन कार्यकारणभावः कल्पनीय इति वाच्यं पुरुषभेदेन कार्यकारणभावकल्पने गौरवापत्तेः
न च तथाविधस्वीयव्याप्यप्रकारतानिष्ठविशेष्यतावच्छेदकावच्छिन्नत्वस्य समानाधिकरणज्ञाननिरूपिततोभयसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्य
जनकतावच्छेदकीभूतधूमप्रकारतायां निवेशान्न पुरुषांतरीयाप्रामाण्यज्ञानमादायानुपपत्तिः एकपुरुषीयधूमप्रकारतायां पुरुषांतरीयाप्रामाण्यज्ञानसमानाधिक
रणज्ञाननिरूपितत्वाभावात् ज्ञानभेदेन विषयताभेदांगीकारादिति वाच्यम् एकपुरुषस्याप्रामाण्यज्ञानास्कंदितधूमप्रकारकज्ञानसत्त्वे पुरुषांतरस्य तदनास्कंदितज्ञा
नदशायां पुरुषांतरस्यानुमित्यनुदयापत्तेः ज्ञानभेदेन विषयताभेदे मानाभावात् पुरुषांतरज्ञानीयधूमप्रकारतायामन्यपुरुषीयाप्रामाण्यज्ञानसमानाधिकरणत्व
दीयधूमप्रकारकज्ञाननिरूपितत्वसंबंधेन तद्वृत्तितोपदर्शितसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्य तत्त्वसत्त्वेन कारणाभावात् एवं स्वावच्छेदकव्याप्यत्वा
वच्छिन्नत्वस्य निरूपकज्ञाननिरूपिततोभयसंबंधेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपितभावप्रकारतानिरूपितव्याप्यत्वावच्छिन्नप्रतियोगितासंसर्गावच्छिन्न
प्रकारतानिरूपितविशिष्टं यत्तद्भिन्नत्वम् अनुमितिजनकतावच्छेदकीभूतधूमप्रकारतायां निवेश्य वह्निव्याप्यधूमो वह्निव्याप्याभाववान्पर्वतो धूमवांश्चेति ज्ञानद्वयकालेनुमि राम
त्यनुपपादनमपि विमांसकानामनालोचनविजृंभितमेव यतो ज्ञानभेदेन विषयताभेदानंगीकर्तृणां नये वह्निव्याप्यप्रकारतायामुपदर्शितोभयसंबंधेन संस २
र्गीयतथाविधवह्निव्याप्यप्रकारताविशिष्टत्वेन वह्निव्याप्य [illegible] इति विशिष्टपरामर्शादपि पर्वतो वह्निमानित्यनुमित्यनुपपत्तिरिति नवीनपरिशीलितः पंथाः॥

एवं तादृशानुमितिं प्रति पर्वतत्वावच्छिन्नविशेष्यकधूमप्रकारकधूमत्वावच्छिन्नविशेष्यकव्याप्तिज्ञानयोर्हेतुतावादिमते वह्निव्याप्यवान् पर्वत इति शाब्दपरामर्शादनुमित्यपत्तावापत्तेः
तदानीं धूमत्वावच्छिन्नविशेष्यकव्याप्तिज्ञानादेरभावादनुमित्यनुपपत्तेरिति अथ यत्र तथाविधशाब्दपरामर्शोत्तरं सामग्रीवशाद्वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्तत्र घटेतत्त
त्रैव तथाविधानुमितिः स्वीक्रियते तथापि मीमांसकमते पूर्वोपदर्शितदूषणं विना बाधमेव च एवं तन्मते हेतुतावच्छेदकभेदेनानुमितिपरामर्शयोः कार्यकारणभावभेदप्रयुक्त
गौरवं दुष्परिहरमेव नैयायिकमते तूपदर्शितपरामर्शोत्तरं वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं न जायते तत्र सामग्री क्रियते तथापि मीमांसकमते पूर्वोपदर्शितदूषणं वि
नः इति मन्ते पर्वतो द्रव्यपक्षवह्निविधेयकानुमितिं प्रति साध्याभाववद्वृत्तित्वरूपव्याप्तिविशिष्टधूमप्रकारकपर्वतविशेष्यकनिश्चयत्वेन हेतुत्वकल्पने हेतुतावच्छेदकभेदेन कार्यकारणभावप्रयुक्त
गौरववार्त्ता न वानुमितिं प्रति हेतुतावच्छेदकविषयतामनिवेश्य तेन रूपेण हेतुत्वकल्पने निश्चयत्वादिकं निर्वचनमशक्यमिति वाच्यम् तन्निर्वचनोपायस्य नवीनमते निर्वचनावसरे
दर्शितत्वात् न च मीमांसकमतेऽपि हेतुतावच्छेदकविषयतामनिवेश्य पर्वतः यत्र व्याप्तिप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यता
कत्वस्य सामानाधिकरण्यकालिकविशेष्यत्वेन तन्निष्ठत्वसंबंधेन ज्ञानविशिष्टज्ञानत्वेन हेतुत्वमनुमितिं प्रति कल्प्यते तथा च नव्यमतेऽपि हेतुतावच्छेदकभेदेन कार्यकारणभा
वप्रयुक्तगौरवस्यावकाश इति वाच्यं तथा सति कारणतावच्छेदकेऽपि तादृशत्रितयसंबंधेन निवेशने गौरवस्य केनाप्युपायेनानिर्वाह्यत्वात् अथ तादृशानुमितिं प्रति वह्निव्याप्य
धूमो धूमवान् पर्वत इति ज्ञानद्वयस्य हेतुत्वं नाधिकं किंतु पर्वतो धूमाभाववान् स्यादित्यापत्तिं प्रति पर्वतो धूमवान् स्यादित्याद्यापाद्यव्यतिरेकनिर्णयस्य हेतुत्वे कल्पनीये तत्रैव का
र्यतावच्छेदककोटावापत्तित्वमनिवेश्याव्यवहितोत्तरत्वसंबंधेन धूमप्रकारकपर्वतविशेष्यकज्ञानत्वं निवेश्य कार्यकारणभावः कल्प्यते एवं वह्निव्याप्यधूमाभाववान् स्यादित्याद्य
त्यापत्तिं प्रति धूमो वह्निव्याप्य इत्याद्यापाद्यव्यतिरेकनिर्णयस्य हेतुत्वे कल्पनीये तत्रैव कार्यतावच्छेदककोटावापत्तित्वमनिवेश्याव्यवहितोत्तरोत्पत्तिकत्वसंबंधेनैव
वह्निव्याप्यो धूम इत्येतादृशज्ञानविशिष्टज्ञानत्वं निवेश्यापि कार्यकारणभावः कल्प्यते न वक्तव्याव्यवहितोत्तरत्वादिसंबंधनिवेशे गौरवात्तदपेक्षयाऽऽपत्तित्वादेरेव नि
वेशनेऽनुमितित्वमिति वाच्यं तथापि तथाविधापत्तिं प्रति धूमवान् पर्वत इत्यादिज्ञानवह्न्याभाववान् पर्वत इत्यादिज्ञानहेतुतायाः परस्परव्यभिचारवारणाय कार्यतावच्छेदकको
टावव्यवहितोत्तरत्वनिवेशस्यावश्यकतयाऽऽपत्तित्वानिवेशेऽप्यनाभोगात् तथा च हेतुसमकार्यकारणभावेनैव तथाविधानुमितिं प्रति तादृशज्ञानद्वयस्य हेतुत्वानि
र्वाहात् न च स्वतंत्रकार्यकारणभावकल्पनप्रयुक्तगौरवं मीमांसकमत इति चेन्मैवं पूर्वोपदर्शितापत्तिं प्रति धूमवान् पर्वत इत्यादिज्ञानवद् धूमाभाववान् पर्वत इत्यादि

शा० ६०
४

ज्ञानानामपि हेतुत्वं कल्प्यते तदेव परस्परं व्याप्तिप्रकारताण्यकार्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशस्यावश्यकतयोपदर्शितयुक्तिः संभवति तदेव न तथा विधापत्तिं प्रतिधूमाभाववान्पर्वत इत्या
दिज्ञानस्य हेतुत्वकल्पने गौरवात् न च यथा धूमत्वावच्छिन्नप्रकारताशालिज्ञानत्वेन हेतुत्वं कल्प्यते तथा व्याप्तिस्खलीयकार्यकारणभावेऽव्यवहितोत्तरत्वनिवेशः क्वचानन्वितेष्वप्रसक्त आप
वसंभवेनेति यद्विचाराद्यो भयरूपेण न सम्यक्किं कालावस्थानयतो दापत्तिं प्रतितथाविधोभयरूपेण हेतुत्वकल्पने विनिगमकविरहात् यतो नैयायिकमते वह्निव्याप्यधूमवान्पर्वत इत्यापत्तिं
प्रतिवह्निव्याप्यवान्पर्वत इत्यादावव्यतिरेकनिर्णयस्य हेतुत्वं कल्पनीयं तत्राव्यवहितोत्तरक्षणत्वनिवेशस्यावश्यकतया देशं वधनवह्निव्याप्यवान्पर्वत इति निर्णयवैशिष्ट्यं निवेशनापत्तिव्यावर्तकविशेषणरूपस्य का
र्यकारणभावे नैवानुमितिं प्रति विशिष्टपरामर्शहेतुत्वनिर्वाहे गौरवाभावात् काशे लाघवावकाशाभावादिति चेत् तथाहि अनुमितिं प्रति विशिष्टपरामर्शहेतुत्वे यत्र धूमवान्पर्वतो वह्निव्याप्यो
धूम इति ज्ञानद्वयमात्रं तत्र अथ चापत्तिजनककारणान्तरं नास्ति तत्रानुमित्यापत्त्या चानुमितिजनकतावच्छेदककोटौ तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वेन तत्तद्व्यक्तिभेदनिवेशनात् नै ज्ञानद्वय०१
यायिकमते तु तत्र विशिष्टपरामर्शरूपकारणाभावेनैवानुमित्यापत्तिवारणसंभवादनुमितिजनकतावच्छेदककोटौ न तथाविधभेदनिवेश इति लाघवं स्फुटमेव एवं मीमांसकानां मते
नुमितिं प्रति ज्ञानद्वयहेतुतायाः स्वीकृतेन निर्वाहे पिपर्वतो वह्निमानित्यनुमितिं प्रति हेतुतावच्छेदकभेदेन सामग्रीव्याप्तेर्भिन्नतया ॥ वश्यकत्वेनाविरोधः एवं न च तथाविधानुमितिसामग्रीव्या
प्तो स्वीयव्याप्तिप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वसंबन्धेन ज्ञानविशिष्टं च यत्तज्ज्ञानं तत्स्य निवेशनीयतया न गौरवाभावका
शः इति वाच्यं सामग्रीव्याप्तिमभ्येकारणतावच्छेदकावच्छिन्नसंबन्धेनैव वेशान्नियतत्वनियमात् अन्यथा सामग्रीव्याप्यवत्सर्वत्र फलानिर्वाहे कार्यकारणभावविलोपापत्तेः केचित्तु पर्वतो वह्नि
मानित्यनुमितिं प्रति वह्निव्याप्यधूमो धूमवान्पर्वत इति ज्ञानद्वयहेतुतावादिमीमांसकमते धूमवान्पर्वतो वह्निव्याप्यधूमस्य मानाधिकरणवह्निमत्पर्वतकालीनालोकवानित्यनुमितिसा
मग्र्या अनंतरघटपटादिप्रत्यक्षं प्रति तत्तत्प्रतिबन्धकताकल्पनेन लाघवसंभवः न नमतेन दार्घर्वतो वह्निमानित्यनुमितिसामग्र्या आवश्यकत्वेन तत्प्रतिबन्धकत्वेपि वत्तत्रानन्तरघटपटादि
प्रत्यक्षानुत्पत्तिनिर्वाहात् नैयायिकेन तु घटपटादिप्रत्यक्षं प्रति तथाविधानुमितिसामग्र्याः स्वातंत्र्येण प्रतिबन्धकत्वमवश्यं कल्पनीयं तन्मते पर्वतो वह्निमानित्यनुमितिसामग्र्याः वह्निव्या
प्यप्रकारकपर्वतविशेष्यकनिर्णयघटितायास्तत्राभावेनतादृशसामग्री प्रतिबन्धकतया निर्वाहासंभवादिति ज्ञानद्वयहेतुतावादिमतमेव सम्यगित्याहुः तदसत् ज्ञानद्वययोगपद्यमतं
गीकुर्वाणानां मीमांसकानां मते सामग्र्याः प्रतिबध्यप्रतिबन्धकभावकल्पनप्रयुक्तलाघवस्यासंभवदुक्तिकत्वापत्तेः न च तथापि ज्ञानद्वययोगपद्यस्यानङ्गीकर्तृणां नैयायिकानां मते तु
पदर्शितलाघवसंभवात् तेरेवकपंनज्ञानद्वयहेतुत्वं कल्प्यत इति वाच्यं तादृशज्ञानद्वयहेतुत्वस्य पूर्वोपदर्शितयुक्त्युपपत्तिगौरवग्रस्ततयातिदुःखलत्वादिति यत्तु घटपटादिप्रत्यक्षं प्रति

श्रा.र.
५

न्नविषयकानुमितिसामग्री। एवं चेद्वैशिष्ट्यप्रतिबंधकता कल्प्यते तदेवोपदर्शितरीत्या सामग्र्याः प्रतिबंधकत्वाभावकल्पनात्तु द्विप्रयुक्तलाघवः संभवति मीमांसकैकमते तदेव न किंतु प्रत्य
क्षं प्रति स्वस्वत्तिप्रतियोगिकत्वसंबंधेन कृतिविशिष्टानुमितिप्रागभावत्वेन प्रतिबंधकत्वं कल्प्यते लाघवसंभवात् कारणकलापरूपसामग्रीप्रतिबंधकत्वकल्पने तु विषयभेदभि
न्नसामग्रीणामनंतप्रतिबंधकत्वकल्पनेन गौरवस्यानिस्तुरत्वात् तत्र मध्ये लाघवगौरवं यस्येति तत्त्वं तमस्मात् तथा सति यत्र वह्नेः प्रत्यक्षानुमितिसामग्री। एवं घटस्यापि तत्र ज्ञानद्व
यं योगपद्यापत्तिः तदुभयसमानविषये प्रत्यक्षसामग्र्यनुमितिसामग्र्योर्योगपद्येऽनुमितिकारणीभूतानुमितिं प्रति स्ववृत्तिप्रतियोगिकत्वसंबंधेन कृतिविशिष्टप्रत्यक्षप्रा
5 गभावस्यापि प्रतिबंधकत्वेनोपदर्शितसामग्री। चतुष्टयसंवलनदशायां कस्याभावेनोपदर्शितविशिष्टप्रागभावद्वयाभावसत्त्वात् प्रत्यक्षानुमित्योर्योगपद्यं ज्ञानद्वयापत्तिर्वा
रयितुमशक्यमिति सर्वं सुस्थमिति ॐ इति ज्ञानकारणताविचाररहस्यम् ॐ श्रीमज्जानकीजानिः शरणम् १८५३ मार्गसुदि १२ सोमे

रम:
५

ज्ञानउपकाशिनीवि च ।

सू. १०

८२